Bamanpukur Humayun Kabir Mahavidyalaya.
Model Question Paper
SANACOR03T – SANSKRIT (CC3)

Full Marks: 50

SECTION – A

1. यथाभिमतं कस्यचिदेकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) चन्द्रापीडं प्रति शुकनासोपदेशः लिख्यताम्।

(ख) कथा-आख्यायिकयोः प्रभेदं निर्दिश्य कथाकाव्यरूपेण कादम्बरी सार्थका न वेति विचार्यताम्।

(ग) बाणोच्छिष्टं जगत्सर्वम् सूक्तिरियं व्याख्यातव्या।

(घ) संस्कृतभाषया टीका लिख्यताम् – (देवनागरीलिप्या) कथासरित्सागरम्, वासवदत्ता, दशकुमारचरितम्, शिवराजविजयम्,

(ङ) संस्कृतगद्यसाहित्यस्य प्रकृतिविवर्तनञ्च लिख्यताम्।

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम्। 5×3 = 15

(क) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयम् उपभोगमृगतृष्णिका।

(ख) गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलस्नानम्, अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरूकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः, प्रजागरः नोद्वेगकरः।

(ग) विशेषेण राज्ञाम्, विरला हि तेषामुपदेष्टारः। प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात्।

(घ) विश्वरूपत्वमिव गृहीत्वा आश्रिता नारायणमूर्तिम्। अप्रत्ययबहुला च दिवसान्तकमलमिव समुपचितमूलदण्डकोषमण्डलमपि मुञ्चति भूभुजम्। लतेव विटपकानध्यारोहति।

(ङ) परस्परविरुद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरित्रम्। तथाहि सततम् उष्माणमारोपयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावतामाविष्करोति, तोयराशिसम्भवापि तृष्णां संवर्द्धयति। ईश्वरतां दधानापि अशिवप्रकृतित्वमातनोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति। अमृतसहोदरापि कटुविपाका।

(दे:)

(च) किं वा तेषां साम्प्रतम्, येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम् अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः पराभिसन्धानपरा मन्त्रिण उपदेष्टारः, नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिर्मारणात्मकेषु शास्त्रेषु अभियोगः सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः

5×3 = 15

अथवा

अधोलिखितेषु विषयेषु यथेच्छं त्रयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत।

(क) शुकनासः (ख) यौवराज्याभिषेकं (ग) चन्द्रापीडः (घ) गद्यकाव्यं (ङ) कादम्बरी (च) बाणभट्ट

## SECTION – B

10×1 = 10

3. निम्नलिखितेषु प्रश्नेषु कस्यचिदेकस्योत्तरं प्रदेयम्।

(क) वसुरक्षितः कः? अनन्तवर्माणं प्रति तस्योपदेशाः आलोचनीयाः।

(ख) "दण्डिनः पदलालित्यम्" इति उक्तिरियं तात्पर्यं लिख्यताम्।

(ग) संस्कृतः गद्यकाव्ये कथा-आख्यायिकयोः लक्षणानुसारेण दशकुमारचरितस्य स्थानम् निर्णेयम्।

(घ) चन्द्रपालित कः आसीत्? तेन असदुपदिष्टः अनन्तवर्मा केन प्रकारेन राज्यं विघ्नितवान्?

4. यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः:-

2×5 = 10

(क) विश्रुतः कः? विश्रुतेन वृद्धः किं जिज्ञासितम्?

(ख) दशकुमारचरिते दशकुमाराणां कानि नामानि लिख्यताम्?

(ग) पुष्पवर्मणः परिचयः कः?

(घ) विहारभद्रस्य परिचयः कः?

(ङ) "अद्य दृष्टो दुःस्वप्नः दुःस्थाः ग्रहाः। शकुनानि चाशुभानि"– कदा के कमिदमुक्तवन्तः? ते वक्तारः अस्मिन् विषये कीदृशविधानं अयच्छन्?

(च) किमर्थं केवलं दण्डनीति अध्येयम्? – केन कः उक्तमिदम्?

(छ) 'मृगया ह्यौपकारिकी न तथाऽन्यत्'– कथं मृगया औपकारिकी?

(ज) कुलाङ्गनानामाचरणं कीदृशमसीत?

(झ) विश्रुतस्य का प्रतिज्ञा आसीत्?

(ञ) 'अथ कर्णे जीर्णमब्रवम्'– कः केन कर्णे किमुक्तम्?

P.T.O.

अथवा

(क) गद्यम् किम् ? गद्यस्य मुख्यत: कियन्तौ भेदौ स्त: ?

(ख) गद्यकाव्यस्य 'त्रयी' इति के कवय: सन्ति ? सुबन्धुना रचितं गद्यकाव्यं किमस्ति ?

(ग) दण्डिन: समय काल: क: भवति ? दण्डिन: विरचितं गद्यकाव्यं किमस्ति ?

(घ) दशकुमारचरितस्य उपजीव्य: विषय: कोऽस्ति ? राजहंसस्य पुत्र: क: भवति ?

(ङ) बाणभट्टस्य पृष्ठपोषक: क: आसीत् ? हर्षचरितं किं प्रकारकं गद्यकाव्यम् ?

(च) तिलकमञ्जरी काव्यस्य कवि: क: भवति ? तिलकमञ्जरी गद्यकाव्यस्य विषय: कोऽस्ति ?

## SECTION – C

5. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1=5

(क) हर्षचरितम् (ख) शिवराजविजयम्

(ग) अम्बिकादत्तव्यास: (घ) पुरुषपरीक्षा

(ङ) बृहत्कथामञ्जरी (च) वेतालपञ्चविंशति: